१३ पत्र

गदाधरीटीकायां काशिकाख्यायां लिंगकरणता

१५५८

लिंगकरणता

४ विशेषणेनद्रु ४
लिंगपरिच्छिन्नं तथे

ग·दी· ॥श्रीगणेशाय नमः॥ ॥व्यापकताज्ञानकारणतां निराकृत्य न तु परामृश्यमानं लिंगमिति पूर्वोक्तं प्रसंगतः प्रपंचयति मूल एवमिति। परामर्श
१ मात्रं ज्ञानमात्रं गादाधर्यो उपलक्षणस्यैव कार्यो व्यवहितप्राक्क्षणे सत एव। परिचायकत्वप्रतिक्षेपे [illegible]
[illegible] णा। उपलक्षणत्वाभिप्रायकरणेन लिंगमेवेति लिंगं विशेषणं न तु [illegible] मित्यर्थः। अत्रैव कारणमित्र क्रमः तथा च लिंगं विशेषणमेवे
त्यस्य लिंगं नोपलक्षणमित्यर्थ इत्याशयेन शंकते न चेति। अतीयत इति। इन्द्रियसंयोग उपलक्षणत्वाभावादिति भावः। अत इत्युक्त शंका मध्यस्थ परि
चायकत्वपदस्येति शेषः। तत्सामान्येति· विशेषणत्वोपलक्षणत्वान्यतरेण परिचायकत्वस्यावश्यकत्वादिति भावः। उपलक्षणतया परिचाप
कत्वनिराकरणं परिचायके उपलक्षणत्वनिराकरणपर्यवसन्नं। अत्र तर्कालंकारैः विशेष्यान्वयिनान्वयित्वं विशेषणत्वं यथा परामर्शान्वयि
हेतुतयान्वयित्वं। एवं नोपलक्षणतयेति दीधितेः न भावकोन्तरोपस्थापकतयेत्यर्थमभिधाय काकवं नो गृहा इत्यादावुत्तरणत्वस्या वर्त्तकान्तरं। त
दुपस्थाप्य आवर्त्तकतया काकादिरुपलक्षणं परामर्शे च तथा लक्षणं न तदभावाल्लिंगं न तथेति यद्व्याहितं तत्र तन्न रुचिरं। तथा चेति मूलस्य तद सि
व वतारिकाया असामंजस्यापत्तेः विशेषणतया एव हेतुतान्वयरूपतया तद्धर्म स्थापकत्वात् किं च विद्यमानं सद्व्यावर्त्तकं विशेषणं अवि
द्यमानं सद्व्यावर्त्तकमुपलक्षणमित्याशयेन ग्रंथः प्रणीत इति नानागतलिंगस्य विशेषणत्वभंगो वर्ण्यते अनुमितिसमये विद्यमानताला रामः
भसंभवादिति स्वपंक्तेरनोऽनुपदमभिधानीयत्वाच्च न तथेत्यच दीधितिकृद्भिर्व्याख्यातमित्युपलक्षणतयेत्यस्यार्थान्तरमप्यनुचितमिति। तस्य १

अविशेषणत्वेऽपि हि असिद्धिवारणाय लिंगस्याविशेषणतामात्रं न तु पक्षतावच्छेदकत्वमपि· तेनानुमितेरपक्षतावच्छेदकावच्छिन्नसाध्यविरोधित्वान्नर्थाद्धिः

तिविशेषणमेवेति मूलस्य विशेषणतया परिचायकमेवेत्यर्थः नोपलक्षणतया परिचायकं। परामर्शे विषयितासंबंधेन अनुमितेरव्यवहितप्राक्क्ष णे सत्त्वादिति भावः। विशेष्यांतराभावे इति मूले च विशेष्यांतरस्यैव विशेषणत्वमस्तु न लिंगस्येत्याशंकावारणाय तत्त्वे इति तथा च दीधितौ पुनः शब्दो न हेतुतानिर्वाहकमन्यथासिद्धत्वमिति शेषः। मूले परिचायकतयेत्यस्यावच्छेदकतयेत्यर्थः। विशेषणतया परिचायकस्याप्यन्यथासिद्धत्वे द्विया दे अपि तथात्वापत्तेरिति भावः। व्याप्त्यादीति द्वितीयहेतो विशेषणानां विशेषणसमानकालीनत्वविशेष्यविषयकत्वाभावात्वानां विशिष्टबुद्धित्वं नि र्विकल्पके व्यभिचारवारणार्थ। इतित्साग:। किंचिदिति। अंततो लिंगस्यैव जनकत्वात् इत्यादीति द्वितीयहेतोस्साध्यांशे धूमविशेषणिकायां तती ये च समानकालीनत्वग्रहं विना धूमविशेषणिकेत्यर्थः। दृष्टांतविरोधेनेति। न तो दृष्टपतावच्छेदकविशिष्टेयद्विशेषणसमानकालीनत्वेन बुद्धिः हेतुप्रविष्टा एवं च दृष्टोपुरुषइतिप्रत्यक्षस्याज्ञापमानविशेष्यतावच्छेदकावगाहित्वेपि न विरोधः तस्यो दृश्ये विशेषणत्वाभावादितिवाच्यं। विशिष्ट बुद्धिसामान्ये विशेषणज्ञानत्वेन हेतुतया विनिगमनाविरहात् विरहाज्ज्ञापमानविशेषणत्वेनापि हेतुत्वमित्याशयेनेदं तन्मते प्रयोजनाभा वे न तथा विवक्षणासत्त्वात्। विशिष्टप्रत्यक्षत्वावच्छिन्नं प्रत्येव विशेषणज्ञानत्वेन हेतुतेतिमतानुरोधेन यद्यपीत्यादि उद्देश्यतावच्छेदकादिवि वक्षणं अनुमित्युदाहरणं च। प्रत्यक्षे विशेषणज्ञानतया विशेष्यतावच्छेदकज्ञानस्य हेतुत्वादिति। धूमध्वंसएवेति धूमध्वंसवान्पर्वतो धूमका लीनवह्निमानित्यनुमितिधूमध्वंसजन्या गौरवापत्तेरिति न च साक्षात्संबंधावच्छिन्नत्वं परंपरासंबंधानवच्छिन्नत्वं वा मुख्यविशेष्य

ग॰टी॰ २ 2 तानिरूपितविशेषणतायां प्रवेशे पूर्वरूपाप्रयासापत्तेः। ननु मुख्यविशेष्यतानिरूपितविशेषणतासामानाधिकरण्यस्यैव हेतुघटकत्वसंभवादा
पन्नत्वांशवैयर्थ्यमित्यत आह नत्विति। न च मुख्यविशेष्ये पर्वतेऽपि धूमस्य विशेषणत्वेन तदापन्नत्वं कुतो नेति वाच्यं। न त्यत्र पर्वतपरतंत्रधूम
स्य वह्नौ भानं किंतु कालपरतंत्रस्येति मुख्यविशेष्ये विशेषणतापन्नतासंभवात्। विलक्षणसंसर्गेणाविशेषणतया विशिष्टतदवगाहि
त्वं तद्विशिष्टवैशिष्ट्यबुद्धित्वमिति निष्कृष्टमते धूमकालस्यैव विशेष्यविशेषणत्वेन धूमस्यैतस्य तादृशविवक्षावैयर्थ्यं स्वचनापाह इदं चेति। य
थाश्रुतस्य विशेष्यनिष्ठनिष्ठत्वमात्राघटितस्य विशेष्यनिष्ठत्वे सति विशेष्यतावच्छेदककालावच्छिन्नवृत्तिकत्वस्य च। अन्यथैव पक्षसमानका
लीनत्वविशिष्टसंसर्गेणाधर्मीतरेसादिक्रमेणा अयं च हेतुस्तत्तीयोभविष्यति तत्कालं कारास्तु विशेष्यनिरूपितयद्धर्मनिष्ठविशेषणताप्रयुक्त
तद्धर्मसमानकालीनत्वावगाहित्वमर्थः तदानीं धूमवान्पर्वतो धूमसमानकालीनवह्निमानित्यादेरसाध्यांशे विशेषणताप्रयुक्तमेव धूमसमा
नकालीनत्वावगाहित्वमित्याहुः। तेषां विशेषणत्वे विशेषणतापन्नस्यैवेत्यादिदीधितिग्रंथोऽलग्नकः स्यादिति। विधेयभानांशे धर्मितावच्छेदक
त्वनिवेशोपधिकं तन्नेताधूमस्याधिकरणपक्षतावच्छेदकप्रवेशो व्यभिचारे नवार्यत इत्यत आह यद्धर्मधर्मितावच्छेदकीकृत्येति। अथ स्वीयपदधर्मनिष्ठध
र्मितावच्छेदकतानिरूपितायाविधेयतातदवच्छेदकतापर्याप्त्यधिकरणतापन्नसमानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छिन्नविषयताकत्वनिवेशा ग॰म॰ २
नुमितित्वं तस्मादायदोष इत्यत आह समूहेति विधेयत्वेतीय हि धेयत्वं तदवच्छेदकीभूतसमानकालीनत्वधर्मितावच्छेदकतापन्नधर्मावच्छिन्नं च यद्धि

षयित्वं एकविशेष्यतानिरूपितंतदुभयविषयताशालित्वशाब्दबुद्धित्वं हेतुरित्यर्थः। अनुमितौ विधेयताभेदेन विशेष्यताभेदमते नेदं अन्यथा एक
त्रद्वयमितिरीत्या तादृशानुमितिमादाय व्यभिचारो दुर्वारः। स्वानिरूपकेति। स्वानिरूपकज्ञाननिरूपितविधेयतावच्छेदकतापर्याप्त्यधिकरणं
यद्रूपं तत्समानकालीनत्वधर्मितावच्छेदकताप्तत्वं यद्धर्मनिष्ठधर्मितावच्छेदकताकतद्रूपावच्छिन्नविषयताका शाब्दबुद्धिर्यासाज्ञापमानविशेष
ताज्ञाप्येतिव्याप्तिरित्यर्थः। तादृशविधेयतावच्छेदकताव्यापकीभूततादृशधर्मितावच्छेदकतावच्छिन्नावच्छेदकताकविषयितेति यावत्। स्व
चरणविषयता। स्वानिरूपकज्ञानानिरूपितत्वनिवेशात् धूमवान् पर्वतो वह्निमान् धूमकालीनवह्निमांश्चेति आलोकादिलिंगकानुमितौ न व्यभि
चारः इत्याह समूहेति तदीयधूमसमानकालीनवह्नित्वावच्छिन्नविधेयतारूपविषयतायाः स्वानिरूपकज्ञानानिरूपकत्वेपि तदवच्छेदकतापर्याप्त्य
धिकरणं न समानकालीनत्वधर्मितावच्छेदकताप्तमिति तादृशविधेयतावच्छेदकताव्यापकप्तसमानकालीनत्वधर्मितावच्छेदकतावच्छिन्नाव
च्छेदकत्वाभावात्। तदीयशुद्धवह्नित्वावच्छिन्नविधेयतारूपविषयतायाश्च समानकालीनत्वधर्मितावच्छेदकतावच्छिन्नावच्छेदकताकत्वविर
हेण स्वपदेनोपादानासंभवात् पूर्वोक्तविषयतायाउपादाने स्वानिरूपकज्ञाननिरूपितत्वेन तत्र हेत्वभावादित्यर्थः। स्वनिरूपितेति निरूपकमात्रनि
रूपितत्वे हेतुगर्भउद्देश्यतावच्छेदकतारूपधूमकालीनवह्नित्वावच्छिन्नविषयतारूपं यत्स्वं तस्य तद्निरूपकानिरूपितविधेयतावच्छेदकताव्यापक रु३
समानकालीनत्वधर्मितावच्छेदकत्वावच्छिन्नावच्छेदकताकत्वादिति भावः। परस्परेति। अन्यथा व्यभिचारो वक्ष्यते। अविशेषणेनेति स्वातंत्र्येणेति

ग॰दी॰ ३ 3

वापारः। एतन्मतेऽपि विधेयताभेदे विशेष्यताभेदः अन्यथा एकत्रद्वयमिति रीत्या धूमवत्त्वेनैव वह्निधूमकालीनवस्तूभयानुमितावालोकलिंगिका
यां व्यभिचारः। अत्रैतादृशरीत्या यन्नुमतं परिष्कर्तुमीशामहे तथाहि स्वनिरूपकविशेष्यतानिरूपितविधेयतावच्छेदकताव्यापकयत्समानकाली
नत्वधर्मितावच्छेदकत्वावच्छिन्नावच्छेदकताकयद्धर्मनिष्ठधर्मितावच्छेदकताकविषयताकाशाद्बुद्धित्वं हेतुः तत्र धूमवानयं धूमकालीनवह्निमा
न्पर्वतो वह्निमानालोकादित्यादौ धूमकालीनवह्नित्वावच्छिन्नविषयताशुद्धवह्नित्वावच्छिन्नविधेयतयोरेकधर्मितानिरूपितत्वसत्त्वेन तादृशवह्निनि
ष्ठधर्मितावच्छेदकतारूपविषयतायाः स्वपदेनोपादानसंभवाद्व्यभिचार इति तद्वारणार्थं यद्धर्मविशिष्टेत्यादि वक्तव्यं। न च तदुपादानेऽपि तादृशविषयता
यां धूमनिष्ठावच्छेदकतानिरूपकधर्मितानिरूपकत्वसत्त्वेन व्यभिचारेण वार्यत इति तद्वैयर्थ्यं दुर्वारमिति वाच्यं। तत्पदेन यद्धर्मनिष्ठावच्छेदकनिरूप
कविशेष्यतात्वावच्छिन्ननिरूपितत्वस्य विवक्षितत्वात्। उक्तविषयतायां च वह्नित्वावच्छिन्नविधेयतानिरूपितविशेष्यतात्वावच्छिन्ननिरूपितत्वस्यै
वोपगमात्। अथ लाघवेन विषयतायां विशेष्यतावच्छेदकताभेदस्यैव निवेशेनोपपत्तेः यद्धर्मविशिष्टेत्यस्यानतिप्रयोजनत्वमितस्तन्न दूषणाना
स्पर्शी। अस्माकं तु धर्मितावच्छेदकताभेदनिवेशोचितः शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसमानकालीनवह्नित्वावच्छिन्नविषयताया धर्मि
तावच्छेदकताभिन्नायाः स्वपदेनोपादानसंभवात्तद्धेतुसत्त्वेन व्यभिचार इति यद्धर्मविशिष्टेत्यस्य न वैयर्थ्यं अथैकविषयतानिरूपितत्वकस्यैव तत्र धूम
वह्निधूमसमानकालीनवह्नीनां त्रयाणां शुद्धपर्वतत्वावच्छिन्नविशेषणतया वह्निरूद्देश्यतावच्छेदकतातत्र वह्नित्वावच्छिन्नविधेयत्वसमानकालीन
वह्नित्वावच्छिन्नविषयतयोरेकविशेष्यतानिरूपितत्वाद्व्यभिचार इति यद्धर्मविशिष्टेत्यस्य सार्थकमिति चेन्न। उद्देश्यतावच्छेदककोटिप्रविष्टवत्त्व एम॰ ३

नांविधेयतानुगमादिति चेत् धर्मितावच्छेदकताभेदनिवेशे पक्षधर्मविशिष्टे स्वरूपासार्थक्येपि स्वमतेन तत्सार्थक्यं सार्थक्य गुरुमार्गानुसरणात्सौचित्यात्तया
प्यासन्निवेशोऽस्मन्मतेपि सार्थक्यादिति। वस्तुतस्तु अतिलाघवेन विषयताकमेव विवक्षणीयं तादृशविषयताया विधेयतात्वादितिभवतामपि सा
ध्यतावच्छेदकधर्मविशिष्टे इत्यस्य विधेयधर्म्यंशे एवं विधेयत्वतादृशविषयत्वयोरेकांशत्वात् एकविषयतानिरूपितत्वमुक्तमिति। किंचिद्धर्मेति। इदमत्रबो
ध्यं पक्षे किंचिद्धर्मविशिष्टविशेषणत्वस्य पक्षधर्मे आवश्यकत्वेन धर्मे पक्षपदार्थान्तर्भावो विफलः। न च समानकालीनत्वादिविशिष्टपक्षपदार्थनिवेशादिह आ
वश्यकः अन्यथा नियमशरीरानुपपत्तेरिति वाच्यं। तथा सति धूमवान् पर्वतो वह्निमान् आलोकादित्यादौ व्यभिचारापत्तेः समानकालीनत्वविशिष्टपक्ष
पदार्थान्तर्भावस्यावश्यकत्वात् पर्वतत्वावच्छिन्नविशेषणतापत्तेरिति। तथा च धूमवद्धूमसमानकालीनवह्निमत्पर्वतो वह्निमानित्याकारेणान्यलिंगका
नुमितित्वेनैवेत्यर्थः। संग्रहायेति। अन्यथा तत्र लिंगजन्यत्वासिद्ध्यापत्तेः पक्षादृष्टिरिति। एवमुक्तसाध्ये एवमुक्तहेतुसमानकालीनत्वग्रहाजन्यत्वेन पक्षो
विशेषणीय इति भावः। अर्थविशेषलाभार्थत्वेन वैयर्थ्याद्वाऽसंभवादाह वस्तुतस्त्विति। अबाधादिति निरुक्तसमानकालीनत्वविशिष्टप्रतियोगिक
त्वेन संबंधत्वे तु भ्रमत्वोपपत्तावपि गौरवं लाघवेन निरुक्तसमानकालीनत्वविशिष्टसंबंधस्यैव विधेयसंबंधत्वसंभवादिति भावः। वैलक्षण्यात्तामंजस
मिति। साध्यसमानाधिकरणधूमाधिकरणतावच्छेदककालावच्छिन्नपक्षकस्थलमेव नास्तीति बोध्यं। अत्र धूमालोकादिपरामर्शानां परस्परव्यभिचा
रवारणाय कारणतावच्छेदकलिंगेन वह्निनिवेशे गौरवात् लिंगविषयताया कार्यतावच्छेदकत्वमाचार्यैरुक्तं। तत्र वह्निव्याप्यधूमप्रकारताको निरूपितपक्षवि

ग.टी. ५

शेष्यताशालिनिश्चयत्वावच्छिन्ननिरूपितकार्यतावच्छेदकं न धूमप्रकारकपर्वतोद्देश्यकवह्न्यनुमितित्वं । वह्निव्याप्यधूमवन्महानसं वह्नि-
व्याप्यालोकवांश्च पर्वत इति ज्ञानजन्यायां धूमवन्महानसं व्यालोकवत्पर्वतश्च वह्निमदित्यनुमितौ व्यभिचारात् । नापि धूमविशिष्टपर्वतो-
द्देश्यकत्वगर्भं यतः शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमाभावप्रकारकत्वरूपं निश्चयत्वं निवेश्यं तत्र शुद्धत्वानिवेशे नील-
पर्वतो वह्निव्याप्यधूमाभाववान् पर्वतो वह्निव्याप्यधूमवानिति ज्ञानस्य निश्चयत्वानुपपत्तेः । एवं च नीलपर्वतो वह्निव्याप्यधूमवान्न वेति संशयाद्धू-
मवान्पर्वतो वह्निमानित्यनुमित्यापत्तिरतः शुद्धपक्षविशेष्यकत्वगर्भं दलान्तरं वाच्यं । तथा च वह्निव्याप्यालोकवान्पर्वतो वह्निव्याप्यधूमवानिति प-
रामर्शजन्यायां धूमवानालोकवान्पर्वतो वह्निमानित्यनुमितौ व्यभिचारः । न च कार्यतावच्छेदककोटावपि धूमान्यपर्वतत्वान्यानवच्छिन्नत्वं पक्षविशेष्य-
तायां निवेश्यमिति न व्यभिचार इति वाच्यं । तथापि पर्वतैकत्रद्वयमिति रीत्या धूमपर्वतत्वोभयं धर्मितावच्छेदकीकृत्य धूमपरामर्शात्तज्जन्यायां धूमवान्
धूमवान्पर्वतो वह्निमानित्यादौ व्यभिचारादिति । अत्राहुः वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वान्यधर्मानवच्छिन्नविशेष्यतानिरूपितवह्नित्वाव-
च्छिन्नविधेयताशाल्यनुमितित्वं तत् । न च तादृशानुमितेः विशेष्यतायां पर्वतत्वान्यधूमावच्छिन्नत्वादसंभव इति वाच्यं । तादृशधर्मावच्छिन्नत्वविशिष्टवि-
शेष्यतात्वानवच्छिन्नधूमप्रकारतानिरूपितत्वस्योक्तत्वात् । नस्यन्नपर्वतत्वान्यधर्मावच्छिन्नविशेष्यतात्वरूपेण धूमप्रकारतानिरूपितत्वसंभवः राम. ५
तथा सति धूमवान् धूमवान्पर्वतो वह्निमानित्यनुमित्याकारापत्तेः । एवमेकत्र द्वयमिति रीत्या धूमपर्वतत्वोभयधर्मितावच्छेदककपरामर्शजन्योक्ता-

नुमितावपि न व्यभिचारः। नापि वह्निव्याप्यधूमवद्दर्शनो वह्न्यभाववानितीतरबाधसत्त्वे आलोकपरामर्शजन्यायामालोकवान्तादृशधूमवान् पर्व
तो वह्निमानित्यनुमितावपि व्यभिचारः। तत्रालोकावच्छिन्नविशेष्यतात्वेन धूमप्रकारतानिरूपितत्वोपगमात्। न च धूमपरामर्शसत्त्वेपि पीतपर्वता
न्यो वह्न्यभाववानितीतरबाधाधीनधूमवान्पीतपर्वतो वह्निमानित्यनुमितेस्तादृशपरामर्शकार्यत्वानुपपत्तिरिति वाच्यं। तत्र धूमपीतत्वयोरेकत्र
द्वयमिति रीत्या वह्निधर्मितावच्छेदकत्वमात्रमुपेयते न तु पीतत्वस्य धूमधर्मितावच्छेदकत्वमिति पर्वतविशेष्यताया धूमप्रकारतानिरूपकतायाः
पर्वतत्वाख्यधर्मावच्छिन्नविशेष्यतानवच्छिन्नत्वोपपादनादिति। वस्तुतस्तु ग्रंथकारमते प्रतिबध्यप्रतिबंधकतावच्छेदकभावायत्तविषयताद्व
यवदन्यत्वं निश्चयत्वं शेषं बुद्धिमद्भिरूह्यं। इदं त्ववधेयं उत्पन्निवादग्रंथालोके लिंगांशे व्याप्यत्वमानं पक्षधरमिश्रैरभिहितं तत्र व्याप्तेर्नानाविधत
या विनिगमनाविरहेण तत्तद्व्याप्त्यवगाहिपरामर्शाणां हेतुत्वे कारणाव्यवहितोत्तरत्वनिवेशभयेन व्याप्तिविषयकत्वं फलस्योपेयमिति न युक्तं
। लाघवेन साध्यासंताभाववदवृत्तित्वस्यैव व्याप्तित्वात्। तद्व्याभाववदवृत्तिधूमवान्पर्वत इति परामर्शात्समवायसंबंधावच्छिन्नवह्न्यभाववद्घटि
तव्याप्तिविषयकपरामर्शाच्च संयोगेन पर्वतादौ वह्न्याद्यनुमितिवारणाय समवायसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितसंयोगसं
बंधावच्छिन्नप्रतियोगितासंबंधावच्छिन्नप्रकारतानिरूपिताभावप्रकारतानिरूपितेत्यादिक्रमेणानिरूप्यनिरूपकभावापन्नविषयतानां कारणता
तावच्छेदकत्वे लाघवात्। साध्यवदन्यावृत्तित्वस्य व्याप्तित्वे द्रव्यवदन्यावृत्तिधूमवान् समवायेन वह्निमदन्यावृत्तिधूमवानिति परामर्शाभ्यां वर्त्तिक

ग.टी. तथाविधविषयतानां निवेशे गौरवात् संयोगादिसाध्यकसद्धेतुपरामर्शे प्रमात्वाभिमाने तु साध्यवद्वृत्तित्वमेव लाघवाद्व्याप्तिरिति। अत्र
५ वदंति अनुमितौ व्याप्तिभाने परामर्शस्य स्वातन्त्र्येण हेतुत्वं न कल्पनीयं विशेष्यतावच्छेदकप्रकारकनिर्णयमुद्रयैव हेतुतोपपत्तेः। न चैवं वह्नि-
व्याप्यधूमवान् पर्वत इति तादृशनिर्णयोत्तरं घटव्याप्यवत्ताज्ञानात् तत्रैव तादृशधूमवान् पर्वतो घटवानित्याद्यनुमित्यापत्तिरिति वाच्यं। तादृशानुमिति
त्वस्य कस्यापि कार्यतानवच्छेदकतया आपादनासंभवात्। न च विशेषधर्मिविरहविशिष्टवह्निव्याप्यधूमवान् पर्वतो घटवानिति सिद्ध्यभाव एवा
पादक इति वाच्यं। आचार्यमते तादृशानुमितिप्रसिद्ध्या तादृशसिद्ध्यभावस्याहेतुत्वात्। न च वह्निव्याप्यधूमवान् पर्वतो घटव्याप्यवान् इति पराम
र्शाधीना वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानित्यनुमितिः तन्नेच्छाविरहविशिष्टवह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानि
ति सिद्ध्यभावो हेतुः स एव तत्रापादक इति वाच्यं। वह्निव्याप्यधूमघटव्याप्योभयावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यकवन्ह्यनुमितित्वस्यैव तादृशसि
द्ध्यभावकार्यतावच्छेदकतया तच्छून्यत्वेन तदापादनासंभवात्। न चैवं दर्शितसिद्धिदशायां घटव्याप्यवान् पटव्याप्यवान् वह्निव्याप्यधूमवान् पर्वतो
घटवानित्यनुमित्युत्पत्त्या व्यभिचारेणानोक्तधर्मः कार्यतावच्छेदकः किंतु घटव्याप्यवह्निव्याप्यधूमपर्वतत्वेतत्त्रितयातिरिक्तधर्मानवच्छिन्नविशेष्यता टि
कघटानुमितित्वमेव तथा चोक्तापत्तिर्दुर्वारैवेति वाच्यं। तथापि वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानित्येतादृशसिद्ध्यभावेन फलजनने वह्निव्या टीम.
प्यधूमवान् पर्वतो घटव्याप्यवानिति परामर्शस्य सहकारित्वेनैवोक्तापत्तिवारणात्। तथा चानुमितौ व्याप्तिभाने परामर्शस्य स्वातन्त्र्येण हेतुत्वाकल्पने प्रयुक्त ५

लाघवमक्षतमेवायदि चैकधर्मिविशेष्यकपरामर्शाद्धर्मितरेणानुमितिः प्रामाणिकी तदा विशेष्यतावच्छेदकप्रकारकनिर्णयस्यापि धर्मिणो न्या १
निवेशेपि च हेतुतानान्यथा परं तु पर्वतत्वसामानाधिकरण्येन वह्निव्याप्यवत्तापरामर्शात्तदवच्छेदेनानुमित्यापत्तिवारणायावच्छिन्नसंयोगघटित
व्यापकतावगाहि धूमसंयोगघटितव्यापकताघटितव्याप्तिविशिष्टहेतुप्रकारकावच्छिन्नसंयोगसंसर्गकपरामर्शयोरन्यतरस्य सहकारित्वे सा
कार्यविधेयता च सिद्ध्यभावकार्यतावच्छेदिकैवेति न तदनुपपत्त्या परामर्शस्य हेतुताप्रसंगः। वह्निमान्पर्वतो घटवानित्यादौ सिद्धेरविरोधित्वापम
णिकारमतेपि विधेयतायाः पक्षतावच्छेदके निवेशितत्वात्। केचित्तु अनुमितौ व्याप्तिभानानुपगमे एकविशिष्टेऽपरवैशिष्ट्यमिति रीत्या वह्निव्याप्य
धूमपर्वतत्वोभयं धर्मितावच्छेदकीकृत्य वह्निव्याप्यधूमप्रकारकस्य वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानिति परामर्शस्य वह्निव्याप्यधूमवान्पर्व
तो वह्निमानित्यनुमितिं प्रति पृथक्कारणत्वकल्पने गौरवं मन्यन्ते तु शुद्धपर्वतत्वावच्छिन्नधर्मिकवह्निव्याप्यधूमपरामर्शहेतुतयैवोपपत्तिरिति तल्ला
घवं। न च तथाविधपरामर्शात्तादृशानुमितिस्वीकारे चिंतामणिकारमताविशेष इति वाच्यं। तादृशस्थले तदविशेषस्याचार्यैरुपगमात्। यत्तु तन्न्या
यभाने वह्निव्याप्यालोकवान्पर्वत इति परामर्शसत्त्वे वह्निव्याप्यधूमवत्पर्वतान्यो निर्वह्निरितीतरबाधसत्त्वे वह्निव्याप्यधूमपर्वतत्वोभयं धर्मितावच्छेदकी
कृत्य वह्निविधेयकानुमित्युपपत्तेस्तादृशानुमितौ तादृशेतरबाधस्य स्वातंत्र्येण हेतुत्वं वाच्यं तदंगीकारे तु तादृशायां वह्निव्याप्यधूमप्रकारकपर्वत
विशेष्यकनिर्णयस्यावश्यकतया तत एव तादृशानुमित्युपपत्तेस्तादृशेतरबाधस्य तत्र तथा हेतुत्वं न कल्पनीयमिति लाघवमिति तन्नापद्मुक्तं

ग॰ टी॰ ६ 6

विशेष्यकस्यैव परामर्शस्य हेतुता तत्र व्याप्तिभाने तादृशोद्बोधकस्य सत्त्वं तत्र हेतुताया आवश्यकत्वात्। मुख्यत्वानिवेशो वह्निव्याप्यधूमवत्पर्वतवा
न् देश इत्याद्यनन्ताहार्यव्यक्तिभेदकूटनिवेशप्रसंगेन महागौरवात्। एतदपेक्षयाऽस्य तद्वेतद्बोधकव्यक्तीनां हेतुत्वौचित्यात्। अत एव पाकानुमानेऽपि
श्रेः पक्षमुख्यविशेष्यकपरामर्शस्यैव हेतुत्वं दर्शितं। प्रदर्शितव्याप्तिभाने धूमलिंगकानुमितिं प्रति अनुमित्साविरहविशिष्टप्रत्यक्षेच्छाविशि
ष्टायाः वह्निव्याप्याभाववान् पर्वतो घटवानिति विशिष्टवैशिष्ट्यप्रत्यक्षसामग्र्याः पृथक् प्रतिबंधकत्वं न कल्प्यते तादृशसामग्रीकाले पर्वतो वह्नि
व्याप्याभाववानिति विशेष्यतावच्छेदकवत्तानिर्णयस्य तद्विरोधिन आवश्यकत्वात्। तदभाने तादृशनिर्णयस्य धूमवान् पर्वतो वह्निमानित्यनु
मित्सप्रतिबंधकतया तत्समाः स्वतंत्रप्रतिबंधकत्वे गौरवमिति तदपि न अनुमितौ व्याप्यभानेऽपि धूमवान्पर्वतो वह्निमानित्यनुमितौ तादृशसाम
ग्र्याः स्वतंत्रप्रतिबंधकत्वाकल्पनेऽपि विरहात् वह्निव्याप्यधूमवद्द्रव्यमित्यादिपरामर्शजन्यानुमितौ तादृशप्रत्यक्षसामग्र्याः पृथक् प्रतिबंधक
त्वे गौरवभयेन द्रव्यत्वादिधर्मितावच्छेदकमनिवेश्य धूमप्रकारतानिरूपितधर्मितावच्छेदकतासंबंधेन वह्न्यनुमितिं प्रति स्वीयानुमितिनिष्ठविशे
ष्यतानिरूपितविशेष्यताकत्वप्रकारतानिरूपितावच्छिन्नत्वप्रकारतानिरूपितप्रकारतासंबंधावच्छिन्नप्रतियोगिताकानुमित्साभावविशिष्टप्र
त्यक्षेच्छाविशिष्टतथाविधप्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनात् तादृशप्रत्यक्षसामग्रीदशायां धूमवान्पर्वतो वह्निमानित्याद्यनुमितेरपि वारणसंभ राम ६
वात्। न चैवमपि कारणानां विशिष्टविशेष्यतावच्छेदकप्रकारकनिर्णयरूपसामग्र्या। अभावः पर्वतत्वे सर्वदैवासत्त्व इति वाच्यं एककालीनत्वेनसंबं

(धर्मितावि शिष्टत्वं प्रविधेत्वेन्वयः)

धेनज्ञप्ताविषसामग्र्याः विशेषितोपगमात् । कार्यकारणोभयदिशि तत्पुरुषीयत्वं निवेश्यं तेन पुरुषांतरीयानुमितौ न पुरुषांतरीयसामग्र्याः प्रति
बंधकत्वापत्तिः । तत्पुरुषीयत्वादेरपि धर्मितावच्छेदकतया तन्निष्ठप्रत्यासत्तिकल्पे पुरुषभेदभिन्नकारणतापत्त्या आवश्यकतया पर्वतत्वादिभेदेन प्र
तिबंधकतानां माधिकात् । तावदपि तन्नव्यमाने अवच्छिन्नसंसर्गघटितव्यापकतावगाहिशुद्धसंयोगेन धूमवत्तावगाहि परामर्शशुद्धसंयोग
घटितव्यापकतावगाहि अवच्छिन्नसंयोगेन धूमवत्तावगाहिपरामर्शयोः परस्परजन्यानुमितौ व्यभिचारः । न च यत्र शुद्धसंयोगघटितव्यापकतापरा
मर्शत्वेनावच्छेदकावच्छेदेनानुमितिर्नोपेयेति वाच्यं । तथा सति यदि च सल्लिंगपरामर्शादपि भ्रमानुमितिरिति ग्रंथेन शुद्धसमवायसंबंधघटि
तव्यापकतावगाहि गंधप्रागभावकालावच्छिन्नघटपक्षकसमवायसंसर्गकपृथिवीत्वादिहेतुकपरामर्शजन्यतादृशकालावच्छिन्नसमवायसं
सर्गकभ्रमात्मकगंधानुमितावतिव्याप्तिवारणासंगतेः । अन्यथा तुल्ययुक्त्या तादृशपरामर्शादपि अवच्छेदकावच्छेदेन भ्रमानुमित्युदयात् तादृश
प्रयासानर्थक्यादिति न च संयोगावच्छिन्नसंयोगे संयोगत्वेनानुगमय्यैकैव कारणता कल्प्यत इति न व्यभिचार इति वाच्यं । अवच्छिन्नसंयोगघ
टिताप्रामाण्यग्रहकाले तद्घटितव्यापकतापरामर्शात् शुद्धसंयोगघटिताप्रामाण्यग्रहकाले तद्घटितव्यापकतावगाहिपरामर्शाच्चानुमितिवारणा
य विशिष्य तेषामुत्तेजकत्वं स्वीकृत्य विशिष्य तथाविधपरामर्शयोरेकाकारानुमितिप्रत्येव हेतुताया वक्तव्यत्वायातात् । एकत्र तादृशाप्रामा
ण्यग्रहयोरुत्तेजकत्वे तु एकसंसर्गघटिताप्रामाण्यग्रहकालोपरसंसर्गघटितव्यापकतापरामर्शादनुमित्युदयापत्तेः । अस्मन्मते चावच्छिन्नसंयोग

मा

द्यटितव्यापकताज्ञानजन्यानुमितौ तद्घटितव्याप्तिरेव प्रसिद्धसंयोगघटितव्यापकताज्ञानजन्यानुमितौ तद्घटितव्याप्तिरेव च भासत इति न परस्य
व्यभिचार इति तदप्यपेशलं। हेत्वाभासग्रंथे पक्षतावच्छेदकैकदेशव्यापकत्वावच्छिन्नत्वस्य संसर्गतायां वक्तव्यतया पर्वतत्वावच्छेदेन धूमप
रामर्शज्ञानादशायां फलस्योपजेयत्वात्। अवच्छिन्नसंयोगेन व्यापकतावगाहिपरामर्शानुसंयोगवत्त्वस्यावच्छेदकीभूतपर्वतत्ववत्त्वोभयसंबं
धेन वह्निविधेयानुमितेरूपगमे न व्यभिचारस्वारस्यादीदृशायुक्तिवलेन व्याप्तिभानसाधनासंभवात् (हरिरामभट्टाचार्याणां विपरीतफलत्वसाद
नं तु अग्रिमग्रंथविरुद्धमिति द्रष्टव्यं। परे त्वाचार्याणां तत्र व्याप्तिभानानुपगमे तेजोव्याप्यधूमवान्पर्वत इति परामर्शकाले वह्निभिन्नतेजोभाववा
न्पर्वत इतीतरबाधाधीनायां धूमवान्पर्वतो वह्निमानित्यनुमितौ व्यभिचारान्न वह्निव्याप्यधूमवत्तापरामर्शहेतुतासंभवः मन्मते तु तादृशबाधस्थली
यानुमितेः तेजोव्याप्यधूमवान्पर्वतो वह्निमानित्साकारतया वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितौ तस्य हेतुतानिर्व्यूहः। यदि चेतरबाधा
धीनतादृशानुमितौ वह्नित्वमिव तेजस्त्वमपि भासते व्यापकतावच्छेदकत्वेन भानस्येव विधेयतावच्छेदकत्वेन भाननियामकत्वात्तथा च व्याप्तेरभा
नेपि न व्यभिचारः तत्र वह्नित्वे विधेयतावच्छेदकत्वानुपगमेन तादृशपरामर्शस्य वह्नित्वावच्छिन्नविधेयकानुमितिहेतुत्वोपगमादित्युच्यते तदा
पि तादृशानुमितौ वह्नित्वस्यापि विधेयतावच्छेदकत्वोपगमे बाधकाभावः तथा सति तेजस्त्वविशिष्टवह्निव्याप्यवह्निभिन्नतेजोभाववत्पर्वतकाली
न तेजोव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्य तेजस्त्वविशिष्टवह्निमान्पर्वत इत्यनुमितिं प्रति स्वातंत्र्येण हेतुत्वं न कल्प्यते तादृशपरामर्शकाले

तथाविधे तद्बाधकालीनतेजोव्याप्यधूमवान्पर्वत इति परामर्शस्यावश्यकतया तद्दशायां वह्नित्वतेजस्त्वोभयावच्छिन्नविधेयताकानुमितिनिर्वा
हात्। वह्नित्वस्य विधेयतावच्छेदकतानुपगमे तु तदुभयावच्छिन्नविधेयताकानुमितेरनुभवसिद्धाया निर्वाहाय तादृशपरामर्शस्यैव कारणता
त्वे महागौरवापत्तेः। न चैवमपि शुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वमेव तादृशपरामर्शकारणतावच्छेदकमतो न व्यभिचार इति वाच्यं।
तथापि तेजस्त्वविशिष्टवह्नित्वावच्छिन्नविधेयताकानुमितौ तेजस्त्वविशिष्टवह्नित्वावच्छिन्नव्याप्यधूमवत्तापरामर्शस्य व्यभिचारवारणार्थमनु
मितावाचार्यैरभिमानो यत्नमादिसाक्षुः। अनुभवादिति। लिंगस्य समानकालीनत्वभानानुपगमे च वह्निव्याप्यालोकवान्पर्वत इति परामर्शा
द्वह्निव्याप्यधूमवदन्यो निर्वह्निरिति ज्ञानदशायां वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवान्पर्वतो वह्निमानित्यनुमितौ धूमपरामर्शस्य व्यभिचारः।
धूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकवह्निविधेयताकानुमितित्वस्य सत्त्वात्। न च धूमेतरप्रकारत्वानिरूपितत्वमपि पक्षविशेष्यतायां
निवेश्यं तथा सति वह्निव्याप्यधूमवान्पर्वत इति परामर्शजन्यायां वह्निव्याप्यालोकवदन्यो निर्वह्निरिति बाधधीनानुमितौ भवन्मते उक्तकारणताया अ
कार्यत्वापत्तेः। अस्मन्मते तु पर्वतत्वान्यधर्मानवच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतापन्नधूमनिष्ठकालीनत्वसंबंधावच्छिन्नप्रका
रताकवह्निविधेयताकानुमितित्वं धूमपरामर्शकार्यतावच्छेदकं। एवमालोकादिपरामर्शकार्यतावच्छेदकं बोध्यं। कालीनत्वसंसर्गावच्छि
न्नप्रकारतापरामर्शनियम्यैवेति धूमालोकपरामर्शादितः धूमालोकादिद्वयवत्तादृशप्रकारतासिद्धिरिति न व्यभिचाराकार्यत्वापत्ती। एवं धूम

ग०टी०
८
8

परामर्शसत्त्वेपि तत्पर्वतान्नो निर्वह्निरितीतरबाधाधीनवह्निव्याप्यधूमवान्पीतपर्वतो वह्निमानित्यनुमितेरपीतत्वधूमधर्मितावच्छेदकत्वा
भावान्न धूमपरामर्शकार्यताभंगः। पर्वतत्वान्यधर्मावच्छिन्नविशेष्यताकत्वात्। नाप्येकत्र ह्रदपर्वतयोरीत्या वह्निव्याप्यधूमपर्वतत्वोभयधर्मिता
वच्छेदककधूमपरामर्शाज्जातायामनुमितौ व्यभिचारः तत्र धूमेपि वह्निधर्मितावच्छेदकतासत्त्वात् प्रसक्तावच्छेदककोटिप्रविष्टधूमप्रकारता
याः कालीनत्वसंबंधानवच्छिन्नतादृश्याः तत्प्रकारतायास्तत्संबंधावच्छिन्नत्वेपि तन्निरूपितविशेष्यतायाः पर्वतत्वान्यधर्मावच्छिन्नत्वात्।
न ह्रदे प्रतिबंधकवशादिति। यत्तु कालीनत्वसंबंधेन धूमोऽस्त्विति ज्ञानस्य प्रतिबंधकत्वापत्त्याऽनुमित्यनुपपत्तिरिति तन्न। तन्मते धूमाभाव
वान्पर्वत इति ज्ञानस्यानुमितिप्रतिबंधकत्ववदेतस्यापि प्रतिबंधकतायाइष्टत्वात्। लिंगरूपेति। अतीतलिंगकालीनत्वावगाहित्वेन प्रसक्तानुमि
त्याविसादिः। तदानीं धूमवान्पर्वतो धूमकालीनवह्निमान् धूमध्वंसादित्याद्यनुमितौ व्यभिचारवारणाय स्वाधग्रहितप्रकृत्तत्व विद्यमानेति।। विशे
षणांतरं प्रथमे विशेष्ये विशेषणाभाववपिन्नत्वं हि तृतीयपदद्मेवि विशिष्टविशेष्यकत्वं तत्तीयेतत्समानकालीनत्वग्रहाजन्यत्वं। इत्यादी साध्विना विरो
धिज्ञानाभावस्यसमानकालीनत्वभानमप्रयोजकत्वेज्ञापमानविशेषणाजन्यत्वेन विशेषणकालवृत्तितया विशेष्यमानेनेयस्यमिति मूलासं
गतिपरिग्रहः। अतीतादिलिंगज्ञानानानुमितिरित्यंशदूषकतया मूलं व्याचष्टे मूल इति स्वव्यापारस्येत्यस्याभिधानं तु अतीतादिलिंगजन्यस्यप
रामर्शस्यनियताव्यवहितपूर्ववर्त्तित्वशंकावारणाय। तस्यतादृशलिंगकालीनतयातद्धिरहएवेतिभावः। अज्ञापमानलिंगांतरेति। अथ लिंग

रा म०
८

रूपकारणताबाधात्समानकालीनत्वावगाहिनीनानुमितिरितिदीधितिरर्थः पदद्वयं समानकालीनत्वावगाहिनी पुनरनुमितिर्भवतु नवेत्युभयथापि
नप्रकृते सत्तिरिति मतनिष्कर्षो वस्तुतो धूमवान्वह्निमानित्यनुमितित्वस्य मानाधिकरण्येनैव लिंगजन्यतासाधनादुक्तसिद्धिसंकोचितात्तथाच १२
कथमुक्तमतप्रलापइवायंग्रंथः संगच्छतेइतिचेन्न।यतःसाध्यांशेकालीनत्वसंबंधेनभानएवलिंगस्यपक्षविशेषणतात्वकिंवाऽभावेपिनाघःयतः
तत्रतथाभानेविशेषणताजन्यत्वंप्रयोजकंवाच्यंतच्चातीतादिलिंगज्ञानाधीनानुमितौदुर्घटंअतस्तत्रपक्षविशेषणतयापिलिंगस्याभानेसर्व
त्रापिपक्षविशेषणतयापक्षतानवच्छेदकलिंगभानमप्रामाणिकं।नद्वितीयःविशेषणताजन्यायाअप्यनुमितेःभवद्भिःस्वीकारेतथाविधानु
मितित्वावच्छिन्नंप्रतिअतीतादिलिंगपरामर्शानांविशेषणताजन्यानुमितिस्वीकारेपक्षविशेषणतायत्रकालीनत्वसंबंधावच्छिन्नलिंगविशे
षतानिरूपितप्रकृतसाध्यविधेयताकानुमितित्वावच्छिन्नंप्रतिविद्यमानलिंगपरामर्शानांचविशिष्यकारणत्वस्वीकारेगौरवात्तदापिपक्ष
विशेषणतयालिंगभानोपगमासंभवात्।वस्तुतस्तुपरामर्शानामनुमितौपृथक्कारणताकल्पनमेवनास्तिपर्वतोवह्निव्याप्यधूमाभाववानित्या
दिसापत्तिंयतिपर्वतोवह्निव्याप्यधूमवानित्यापाद्यव्यतिरेकनिर्णायस्यहेतुत्वेऽव्यवहितोत्तरत्वसंबंधेनतादृशनिश्चयविशिष्टज्ञानत्वावच्छिन्नं
प्रत्येवमणिकारमतेतादृशज्ञानत्वेनहेतुताकल्प्यतेइतिनगौरवंआचार्यमतेतादृशापत्तिंप्रतितादृशनिश्चयस्यपृथक्कारणतायाआव
श्यकत्वात्।एतेनमणिकारमतेधूमालोकादिपरामर्शानांपरस्परजन्यानुमितौव्यभिचारेणकारणताव्यवहितोत्तरत्वविशिष्टानुमितित्वाव

स१

ग॰टी॰ च्छिन्नंप्रतितादृशपरामर्शानांहेतुत्वेगौरवमित्यपास्तं।अनुमितित्वमनिवेश्यज्ञानत्वनिवेशेनकारणतावलावंसंभवसंभवात्।यदिचम
९ णिकारमतेआपत्तेरादार्यैतानिर्वाहायायाथ्यव्यतिरेकविषयताघटितरूपावच्छिन्नंप्रत्येवहेतुत्वंकल्प्यतादृशनिश्चयत्वेनहेतुतावश्यकीति
9 मन्मतेतदाघटादिप्रत्यक्षप्रतिवन्ध्यभावानुमितिसामग्र्याःप्रतिवंधकत्वेतदवच्छेदककोटौवह्निव्याप्यधूमवान्पर्वतइत्यादेस्तदभावव्याप्यव
त्तानिर्णयस्याभावोननिवेश्यतेइतिमणिकारमतेलाघवं।नचैवंवह्निव्याप्यवत्तानिर्णयदशायांवन्ह्यभावानुमितिजनकपरामर्शादिसत्त्वे
घटादिप्रत्यक्षोत्पत्तौबाधकाभावात्तत्रतादृशसामग्र्यभावहेतुतायांव्यभिचारइतिवाच्यं।अव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेनवह्निव्याप्यवत्ता
निर्णयविशिष्टान्यत्वस्यसामग्रीप्रतिवध्यतावच्छेदककोटौनिवेशाद्व्यभिचारस्यवारणीयत्वात्।नचैवंवह्निव्याप्यवत्तानिर्णयसत्त्वेवन्ह्यभा
वानुमितिजनकेतरकारणसत्त्वेयद्घटादिप्रत्यक्षोत्पत्तिःनस्यतादृशनिर्णयाभावघटितवन्ह्यभावानुमितिसामग्रीकालेपिसत्त्वात्तदु
त्पत्तिर्दुर्वारैवेतिवाच्यं।अनुमितित्वमनिवेश्यधूमपरामर्शविशिष्टज्ञानत्वावच्छिन्नंप्रतिधूमपरामर्शत्वेनहेतुत्वस्यकल्पनेनतादृशनिर्णयो
त्तरघटादिप्रत्यक्षस्यापितत्कार्यतास्वीकारेणतादृशनिर्णयोत्तरतादृशप्रत्यक्षसामग्रीमध्येतथाविधनिर्णयस्यापिनिवेशनीयत्वात्।एवंचधू
मलिंगकानुमितौधूमपरामर्शत्वेनपृथक्कारणतानास्तीतिनगौरवं।आचार्यमतेतुवह्निव्याप्यवत्तानिर्णयाभावघटितवन्ह्यभावानुमितिसा गम॰
मग्रीप्रतिवंधकतायांतादृशनिर्णयाभावस्यानिवेशेतत्प्रतिवध्यतावच्छेदककोटौव्यभिचारवारणार्थंतादृशनिर्णयविशिष्टान्यत्वनिवेशेउ ९

परदर्शितापत्तिरिति घटादिप्रत्यक्षं प्रति तादृशानिर्णयाभावे निवेश्यैव तादृशसामग्र्याः प्रतिबंधकत्वस्यावश्यकतया तत्रैतदाकारयोः सहविशे
ष्यविशेषणभावे विनिगमनाविरहेण सामग्रीप्रतिबंधकतावादुक्तप्रयुक्तगौरवं दुर्वारमिति। अपरे तु धूमपरामर्शविशिष्टानुमितित्वाव
च्छिन्नं प्रति धूमपरामर्शत्वेन हेतुत्वे मणिकाराणां न गौरवं आचार्याणामपि धूमपरामर्शविशिष्टत्वस्य कार्यतावच्छेदककोटावावश्यकत्वा
त्। नीलपर्वतो वह्निव्याप्यधूमवानिति परामर्शदशायां नीलपर्वते वह्निमान्न प्रतिबंधकबाधासत्त्वे धूमवान्पर्वतो वह्निमानित्यनुमितिवार
णाय निरवच्छिन्नपर्वतत्वनिष्ठावच्छेदकतायामवच्छेदकतानिरूपकविशेष्यतानिरूपितधूमप्रकारताशालिपरामर्शत्वेन हेतुत्वं वाच्यं तथा
सति दर्शितपरामर्शदशायां नीलो वह्न्यभाववानिति इतरबाधदशायां धूमवान्पर्वतो वह्निमानित्यनुमित्युपपत्तये नीलपर्वतत्वावच्छिन्नवि
शेष्यकपरामर्शानामपि हेतुत्वमावश्यकमिति तेषां परस्परव्यभिचारवारणाय कारणतावच्छेदके तत्तन्निवेशनमावश्यकमेवेति। न चाचार्य
मते तादृशबाधस्थले तादृशानुमित्युपलाप एव समुचित इति वाच्यं। तथा सति घटादिप्रत्यक्षं प्रति नीलपर्वतत्वावच्छिन्नविशेष्यकवह्न्यनु
मितिसामग्र्याः प्रतिबंधकतायां तदवच्छेदककोटौ नीलो वह्न्यभाववानिति बाधाभावनिवेशापत्त्या इतरकारणोः सहतस्य विशेष्यविशेषणा
भावे विनिगमनाविरहनिबंधनसामग्रीप्रतिबंधकतावादुक्तेन महागौरवापत्तेः। तत्र तादृशबाधाभावानिवेशे तादृशबाधसत्त्वे नीलपर्व
तो वह्निव्याप्यधूमवानिति परामर्शोत्तरितसामग्रीसत्त्वे अनुमित्युदयेन भिन्नविषयकप्रत्यक्षस्यैवोत्पत्त्या सामग्रीप्रतिबंधकतायां व्यभिचा

ग०टी० रापत्तेः। अस्मन्मते तु तादृशबाधकालीनत्वानुमितेरेवोक्तत्वाभिन्नविषयकप्रत्यक्षानुदयाद्व्यभिचाराभावेन दर्शितसामग्रीप्रतिबंधकतायां तादृशबा
१० धाभावानिवेशेन लाघवादिति। ननु तादृशबाधकाले तादृशानुमित्युपगमेऽपि निरुक्तसामग्रीप्रतिबंधकतायां दृशबाधाभावोऽवश्यं निवेश्यः पं०ता
10 अन्यथा नीलो वह्न्यभाववानिति ज्ञानसत्त्वे नीलपर्वतो वह्निव्याप्यधूमवान्पर्वतश्च वह्निमानिति सिद्धिपरामर्शसत्त्वे कस्या अप्यनुमितेरुत्प
साद्यप्रसक्तोस्यसा तदनुत्पादापत्तेः। तथा च बाधकाले निरुक्तसिद्धिसत्त्वे तादृशपरामर्शदशायां घटप्रत्यक्षापत्तिवारणाय तादृशबाधाभा
वस्य निवेश्यपर्वतो वह्निमानिति सिद्ध्यभावं निवेश्य वह्निव्याप्यधूमवान्नीलपर्वत इत्यादिपरामर्शघटितसामग्र्याः घटादिप्रत्यक्षप्रतिबंधकत्वक
ल्पने तत्रानुमितिवादिनामधिकमिति चेन्न। तदानीमनुमितिवादिमते वह्न्यनुमितिप्रति वह्निव्याप्यवह्न्यभाववान्नीलकालीनवह्निव्याप्यधूम
वान्नीलपर्वतवान्पर्वत इति परामर्शत्वेन हेतुताकल्पनेन लाघवात्। तदानीं तत्र वह्निव्याप्यधूमप्रकारकनीलपर्वतत्वावच्छिन्नविशेष्यकपरा
मर्शावश्यकतया तद्बलाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितेस्तस्य पर्वते वह्निमनुमिनोमीत्यनुव्यवसायनिर्वाहात् वह्निव्याप्यधूमवान्नी
लपर्वत इति परामर्शस्य तादृशबाधाभावरूपसहकार्यपेक्षया तादृशबाधदशायामनुमित्यनुपगमे तु दर्शितानुव्यवसायनिर्वाहार्थं पर्वतोद्दे
श्यकवह्निविधेयकानुमित्युत्पादानुरोधेन वह्निव्याप्यवह्न्यभाववान्नीलकालीनत्वविशिष्टतथाविधनीलपर्वतप्रकारकशुद्धपर्वतविशेष्यकप राम०
रामर्शत्वेन पृथक्हेतुतापत्त्या घटादिप्रत्यक्षं प्रति तथाविधपरामर्शादिघटितसामग्र्याः पृथक्प्रतिबंधकतापत्त्या च महागौरवापत्तेः॥ तस्मान्नी १०

लो निर्वह्निरिति बाधकाले नीलपर्वतो वह्निव्याप्यधूमवानिति परामर्शाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिः समुक्तिकेव। पर्वतो
वह्निव्याप्यधूमवानिति परामर्शोत्तरं तादृशानुमित्तौ तु न व्यभिचारः कारणाभाववह्नितो जरत्वस्यैवात्रापि निवेशात् विषयविषयितात् तु न निवे
शप्रयोजनाभावात् यदि तु वह्निव्याप्यवन्त्यभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वत इति परामर्शस्य वह्निव्याप्यवन्त्यभाव
वन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वतो वह्निमानित्यनुमितिं प्रति स्वातन्त्र्येण हेतुत्वं वह्निव्याप्यवन्त्यभावविशिष्टधूमवत्कालीनवह्नि
व्याप्यवन्त्यभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वत इति परामर्शस्य स्वातन्त्र्येण तादृशानुमितिं प्रति हेतुत्वाकल्पनलाघवात् तदा
नीं वह्निव्याप्यवन्त्यभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतप्रकारकशुद्धपर्वतत्वावच्छिन्नविशेष्यकपरामर्शस्यावश्यकतया तद्दशायां वह्नि
व्याप्यवन्त्यभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वतो वह्निमानित्यनुमित्युत्पत्तसात्तदा पर्वते वह्निमनुमिनोमीत्यनुव्यवसायनिर्वाहे त्वनु
मितिं प्रति पूर्वोक्तपरामर्शस्य पृथक् हेतुत्वकल्पने प्रयोजनाभावात् तदानीं वह्निव्याप्यधूमप्रकारकनीलपर्वतविशेष्यकपरामर्शाद्वह्निव्याप्यधूम
वान्पर्वतो वह्निमानित्यनुमित्युत्पत्तिस्तु न सम्भवति धूमधर्मितावच्छेदककवन्त्यभावप्रकारकबाधबुद्धेस्तत्प्रतिबन्धिकायास्तदा सत्त्वात्। एवं घटादि
प्रसक्तं प्रति वह्निव्याप्यवन्त्यभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतप्रकारकपर्वतविशेष्यकपरामर्शघटितसामग्र्याः प्रतिबन्धकत्वे उपद
र्शितपरामर्शादिघटितसामग्र्याः स्वतन्त्रप्रतिबन्धकत्वाकल्पनलाघवं। तथाविधपरामर्शकाले वह्निव्याप्यवन्त्यभाववन्नीलकालीनवह्निव्याप्यधूमव

ग.टी. नीलपर्वतवान्पर्वतइत्यादिपरामर्शघटितसामग्र्याः आवश्यकत्वात्तद्बलादेव तदानींधूमप्रत्यक्षाद्यभावोपपत्तेः तथा नीलो वह्न्यभाववानिति बाधकाली
११ नवह्निव्याप्यधूमवान्नीलपर्वत इति परामर्शदशायां वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्युपगमे लाघवाभावात्। घटादिप्रत्यक्षसंप्रति पर्व
॥ तो वह्निमानिति सिद्ध्यभावघटितवह्निव्याप्यधूमप्रकारकनीलपर्वतविशेष्यकपरामर्शादिघटितसामग्र्याः अतिरिक्तानंतप्रतिबंधकताकल्पनगौ
रवाच्च। तादृशबाधकालीनतादृशपरामर्शदशायां तथाविधानुमितिरेव न स्वीक्रियते इति व्यभिचारासंभवेन वह्निव्याप्यधूमवान्पर्वत इत्यादिपराम
र्शजन्यतावच्छेदककोटौ न कारणाव्यवहितोत्तरत्वनिवेश इति सूक्ष्ममीक्ष्यते तदा वह्निव्याप्यधूमवान्पर्वतः तादृशधूमवद्द्रव्य इत्याद्यनंतधर्मिता
वच्छेदकं निवेश्य पृथक्कारणत्वे महागौरवाद्धर्मितावच्छेदकरूपधर्मिघटितसामानाधिकरण्यपक्षतागर्भावच्छिन्नैकात्म्यवृत्तित्वोभयसंबंधेन धूम
परामर्शविशिष्टवह्न्यनुमितिं प्रति समवायघटितसामानाधिकरण्यपधर्मितावच्छेदकताघटितसामानाधिकरण्योभयप्रत्यासत्त्या धूमपरामर्शे
एकहेतुता कल्प्यते। एवमालोकादिपरामर्शादिष्वालोकादिपरामर्शादिवैशिष्ट्यं निवेश्येति चिंतामणिकारमते महालाघवं। आचार्यमते तु
धर्मितावच्छेदकभिन्नानंतधूमपरामर्शानां धूमवत्त्वेनाग्रुद्देश्यकवह्न्यनुमितीनां चादिकं प्रति पृथक्कारणतायामतिमहागौरवं। उक्तरीत्या कार्यकार
णभावोपगमे तु तत एवाप्रलिंगकानुमितौ व्यभिचारवारणात्तदर्थं पक्षतावच्छेदककोटौ लिंगभानमिति युक्तिशैथिल्यात्तत्र लिंगभानासिद्धेः राम.
श १ कारणद्वयानुगमकं च स्ववृत्तिप्रतियोगिकध्वंसवत्त्वस्वप्रतियोगिमत्त्वोभयसंबंधेन ध्वंसवदन्यत्वमिति प्राहुः। न च परामर्शस्य लिंगस्य वा हेतुत्वमि ११

त्तिविनिगमनाविरहोऽज्ञायमानेऽपि संभवतीत्यतोऽत्र आचष्टे लिंगेति। परामृश्यमानेति। विशेषणतया अनुमितिपूर्वकाले विद्यमानतया। उपलक्षणता
विधया कारणतावच्छेदकत्वेऽपि तद्विशिष्टसत्त्वे व फलोपधानेऽत्र अनुमित्सुकोदास्यमानानीति प्रसंगतीति इतः फलोपधानप्रयोजकविशिष्टसत्ताकत्वं वि
शिष्टाधिकरणतागर्भकारणतानिर्वचनमिति यमिथ्याभयेन तादृशकारणतानुपगमे फलोपधीनप्रयोजकोपलक्षितसत्ताकेऽतिप्रसंगमाह
यद्विशिष्टेत्यादिना। तदानस्य परामर्शादितिमूलमर्थयित्वा परामर्शविषयस्येतिमूलार्थं स्फुटयति। एवमिति। लिंगस्य विशेषणतात्वं कारणत्वं
निराकरोति। परामर्शेति। यथाश्रुतार्थः यथाश्रुतमूलार्थः। तदनुमितिकालेऽसत्वेऽपि सामान्यतोऽनुमितिकाले सत्त्वमक्षतमित्याह कालान्तरीणेति
। तदानस्येत्यादेर्यथाश्रुतार्थं निराकृत्य परामर्शविषयस्येत्यादेस्तं निराकरोति परामर्शेति। कारणतावच्छेदकत्वे विशेष्यस्येति तथा च न चेदमज्ञाय
मानेऽप्यस्तीति दीधितेर्न चाज्ञायमानतादृशायामुक्तयुक्तिद्वयसिद्धकारणतावच्छेदकत्वमस्तीत्यर्थः। विशेषणताभिमानेन दूषणं दत्तमि
ति स्फुटयति इदमिति। विशेष्यविशेषणेति। साक्षात्परंपरासंबंधाभ्यां। हृदयमित्यस्वरसस्सूचनार्थं। विशिष्टनिरूपितविलक्षणसंबंधेन सत्त्वे
गौरवाभावात्। एतच्चाग्रे स्फुटं। विद्यमानलिंगान्तरस्यापि विद्यमानपक्ष एव संभावनीयं न तु भाविनि पक्षे इत्याशयेन मूले भाविनीति अतीतेत्यस्य
ध्याहारः वाशब्ददर्शनात्। व्यक्तैकामित्यस्य सोमयज्ञान्वयः। भाविनीत्यस्य अविद्यमाने इत्यर्थः वाशब्दस्यान्वयः। वाक्षणावशिष्टमाये नव्यक्तैकम
मित्येतदतीतपक्षमात्रपरं वा। व्यक्तैकामित्यसंगतं अन्येषामपि मान्यादिनिष्ठानां लिंगत्वसंभवादतः अन्यपदपर्यायैकशब्दान्तबहुव्रीह्यु

ग॰टी॰ न्तरभावप्रत्यक्षस्य तन्निमभिप्रेत्याचष्टे विद्यमानान्यक्तिरिति। विद्यमानत्वासंभवइति अनुमितिकालेइतिशेषः। विशेषणाविधेयेति। तथा
१२ सति एकानयोन्याभावविशिष्टपरामर्शोऽन्याभावस्यापितत्पक्षवृत्तित्वविशिष्टस्यानुमितिकालेविद्यमानत्वाभावाद्विद्यमानलिंगासंभवदूषणा
12 नुपपत्तेः। ननुलिंगसमानकालीनवृत्त्यनुमितिर्जायते तत्राभाविपक्षघटितसमानकालीनत्वभानेइष्टापत्तिरित्यतोमूलेइति। ज्ञापमा
नत्वविशिष्टलिंगकालीनसाध्यभानाभिप्रायकत्वेनार्थमाह अपरामर्शेति। कारणतावच्छेदकविशिष्टसत्ताया आपादकत्वमित्याशयेन।
पलप्येत्युक्तं। उपलक्षितसत्तायास्तथात्वेतदानीं परामर्शासत्वेपितदापत्तेः। तत्कालीनोवर्तमानोपीति। ननुविद्यमानलिंगपरामर्शस्य
लेऽनुमितेरतीतादिवह्निभानमादायभ्रमत्ववारणायजनकतावच्छेदकलिंगविषयतायाः स्वावच्छिन्नाधिकरणतावच्छेदककालावच्छिन्नतद्वृत्तित्वात्त
त्पक्षवृत्त्यधिकरणताकत्वमेवभासतेपक्षवृत्तिसाध्येनात्रप्रत्यक्षवृत्त्यधिकरणताकत्वमानेनुमितेर्भ्रमत्वापत्तेः। एवंचनिरुक्तविद्यमानलिंगात्
तथाविधपक्षवृत्त्यधिकरणताकत्वभानं वाच्यं तथा चवह्नौवर्तमानत्वभानापत्तिरसंगतेवेतिचेन्न। दर्शितकालीनत्वसंसर्गावच्छिन्नलिंगवि
षयतायाभ्रमत्वाघटकत्वे पूर्वोल्लिखनतात्पर्यात्। इदानीं किंचिदधिकरणताघटितत्संसर्गावच्छिन्नलिंगविषयतायाभ्रमत्वाघटकत्वसं
पत्त्यापत्तिसंगतेः। भाष्यादिपक्षेऽप्रसिद्धेस्तथानिरुक्तलिंगकालीनत्वाविषयतायाभानासंभवेनविद्यमानवह्निविषयतायात्रद्घटकतामा राम॰
लोच्यैवोक्तापादनादिति। मूलेधूमासत्ताभावाभावत्वमिति अत्यंताभावस्यान्यप्रतियोगिकत्वमतेनाव्यर्थेति। अन्यतमत्वस्यस्वप्रतियोगि १२

तावच्छेदकतत्तद्देदप्रतियोगितावच्छेदकत्वे अथेत्यादिग्रंथकार्यादूषणांतरमाह अपिचेति। मोहोतेति। व्याप्तिघटकत्वेसतिव्याप्यनतिरिक्त
वृत्तित्वनिबंधनं व्याप्यतावच्छेदकत्वं। वह्नित्वतत्त्वं व्याप्यतावच्छेदकधर्मांतराघटितत्वे सति व्याप्तिघटकत्वमात्रं व्याप्यतावच्छेदकत्वे तंत्रं न तु
भिन्नधर्मसंग्राहकत्वसामानाधिकरण्यमपि तत्र प्रविष्टं तथा सति परिभाषामात्रतापत्तेरिति धूमप्रागभाववत्वादेर्व्याप्यतावच्छेदकत्व
मेवेति तच्च पितु। तद्विशेषेति मूलंप्रमानुमितौ लिंगस्यान्यथासिद्धिपरं चेत्प्रकारत्वेनेति मूलस्य स्वोत्तरोसत्त्वभावानपेक्षत्वेनेत्यर्थः। तन्नि
श्चयासत्त्वनियमादिति। यत्तु विशिष्टवैशिष्ट्यविषयतायाः कारणतावच्छेदकत्वे व्याप्यस्याभावप्रकारकं ज्ञानं जायतामितीच्छावशात् व्याप्यांशेन
हार्यसंशयात्मकव्याप्तिविशिष्टवैशिष्ट्यबोधोदयं वीरइति तदंशे निश्चयत्वनिवेशात्रावश्यकः। न च तादृशेच्छासत्त्वे तद्वदितसामग्र्यावलवत्त्वा
द्व्याप्तिरेव न भासते इति नतत्संशयत्वं तत्र स्यसंभवतीतिवाच्यं। व्याप्तितदभावोभयप्रकारकं ज्ञानं जायतामितीच्छायां व्याप्तेरपि भानसंभवादिति
तन्न। विशिष्टवैशिष्ट्यबोधे संशये च्छाविरहविशिष्टविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात्। अन्यथाप्रकारतावच्छेदकाभावविं
षयतायाविशिष्टवैशिष्ट्यविषयतासामानाधिकरण्ये निश्चयत्वेन कारणतापात्तवच्छेदप्रसंगात्। अन्यपतीति। यस्य तद्वच्छिन्नभिन्न पूर्ववर्ति
त्वधर्मितावच्छेदककोयद्धर्मावच्छिन्नपूर्ववर्तित्वप्रकारकग्रहस्तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नभिन्नपूर्ववर्तित्वेन तस्यान्यथासिद्धिरित्यर्थः।
प्रमाणायार्थक्येपि नक्षतिः व्यवहारभेदस्येवोपपादनीयत्वादित्याशयेनाह अथवेति। संयोगत्वादिनेवेति। कालत्वेन कार्यसामान्ये हेतुत्वमेव तत्त
रू स्थ=१ नत्वस्यापेक्षले दंडसमवेतत्वविजातीयसंयोगनाशस्यापि [illegible] भावत्वेन [illegible] समवेतत्वसमवेतत्वसंबंधेन दंडगतरूपादौ सत्त्वेपि तस्य कारणतानिर्वाहे प्रसा क
नि=२ [illegible] त्वाविरहात्प्रथमपक्षेदोषाहानुपपत्तिरतआह्वयवेति।

ग.री. १३ 13

तस्मात्त्वेन तु तत्तत्कार्यं प्रति आत्ममनःसंयोगस्य च जन्यात्मविशेषगुणोत्पत्तीति तत्त्यागः॥ ॥छ॥ ॥इति लिंगकरणता॥ छ॥ ॥छ

श्लोक ८००

राम १३

[illegible]